**संस्कृत वार्ता:**

**दिनाङ्क : 31/03/2026**

**सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना अहमदाबादस्य साणन्द ओ.एस.ए.टी.-त्यत्र केयन्स-अर्धचालक-संयंत्रस्य उद्घाटनं कृतम् । एतेन सहैव संयंत्रे वाणिज्यिक उत्पादनस्य शुभारम्भः भविष्यति । अस्मिन् अवसरे प्रधानमन्त्री जनसमूहं सम्बोधितवान् ।

- रक्षामन्त्रालयेन अद्य सार्धनवशताधिक एकसहस्र कोटिरूप्यकाणां अनुबन्धं हस्ताक्षरितम् । भारतीयवायुसेनायाः कृते माऊन्टन रडार द्वयस्य क्रयणम् कर्तुं नवदिल्ल्यां भारत-इलेक्ट्रॉनिक्स-लिमिटेड् (बीईएल) इत्यनेन व्यापारः कृत:।

- बिहारप्रदेशे नालन्दाजनपदस्य बिहारशरीफ़े मघड़ा शीतलाष्टमी-मन्दिरे अद्य प्रातः धार्मिकानुष्ठान - समये जनानुधावनस्य कारणात् अष्टौ महिलाभक्ताः मृताः, अन्या: च आहताः।

- कोलकाता-उच्चन्यायालयेन अनेकेषां आई. ए. एस्. तथा आई. पी. एस्. अधिकारिणां, अपि च विभिन्नानां अधिकारिणां च स्थानान्तरणस्य विरोधं कुर्वत्य: याचिकाः निराकृताः।

- इरान्-देशस्य ड्रोन-आक्रमणेन दुबई-तटस्य समीपे एकः विशालः तैलेन पूरितः जलयानः आक्रान्तः।

- आई. पी. एल्. क्रिकेट्-क्रीडायां, न्यू-चण्डीगढ इत्यस्य मुल्लांपुरे महाराजा यादविन्द्रसिङ्घ्-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे, पञ्जाब-किङ्ग्स, गुजरात-टायटन्स इत्येतयोः मध्ये क्रीडा भविष्यति।

**अथ वार्ता: विस्तरेण**

**प्रधानमन्त्री- गुजरातयात्रा**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अहमदाबादस्य साणन्द ओ.एस.ए.टी.-त्यत्र केयन्स-अर्धचालक-संयंत्रस्य उद्घाटनं कृतम् । एतेन सहैव संयंत्रे वाणिज्यिक उत्पादनस्य शुभारम्भः भविष्यति । अस्मिन् अवसरे प्रधानमन्त्री जनसमूहं सम्बोधितवान् ।

एतत् संयंत्रम् उन्नत-बुद्धिमत्-शक्ति-मॉड्यूल् (आई.पी.एम.) इति निर्मितं भविष्यति । एषः भारतस्य अर्धचालकक्षेत्रे महत्त्वपूर्णः विकासक्रमो विद्यते। प्रत्येकं मॉड्यूल इत्यत्र सप्तदश चिप्स् इत्येतानि सन्ति अपि च, तेषां आपूर्तिः कैलि□र्नियायां-अल□ एण्ड् ओमेगा सेमीकण्डक्टर्स् इत्यत्र कारयिष्यते

प्रधानमन्त्री मोदी गुजरातयात्रायां महावीरजयन्त्यवसरे कोबानगरे सम्राट्-सम्प्रति-संग्रहालयस्य उद्घाटनं कृतवान् ।

अयं संग्रहालयः जैन-इतिहासस्य सम्राट्-सम्प्रति-जीवनस्य, तस्य शासनस्य, अहिंसा-सन्देशस्य च कृते समर्पितः अस्ति । अस्मिन् अवसरे जनसभां सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् कोबा-तीर्थं मूल्यानां संरक्षणं करोति, सांस्कृतिक-आचारम् -संस्कारं सशक्तं करोति, ज्ञानं च प्रवर्धयति |. तेन त्रयाणां वर्णानां धाराणां संगम: उक्तः—अध्ययनं, आध्यात्मिकः अभ्यासः,

आत्मानुशासनं च । श्रीमोदी अवदत् यत् एषः  भारतीयसभ्यतायाः आधारः अस्ति। अस्य पवित्रस्य संगमस्य प्रवाहं निर्वाहयितुम् अस्माकं सामूहिकं कर्तव्यम् अस्ति इति प्रधानमन्त्रिणा बोधितम्।

**रक्षा मंत्रालय**

रक्षामन्त्रालयेन अद्य सार्धनवशताधिक एकसहस्र कोटिरूप्यकाणां अनुबन्धे हस्ताक्षरः कृतः। भारतीयवायुसेनायाः कृते माऊन्टन रडार द्वयस्य क्रयणम् कर्तुं नवदिल्ल्यां भारत-इलेक्ट्रॉनिक्स-लिमिटेड् (बीईएल) इत्यनेन व्यापारः कृत:। मन्त्रालयेन उक्तं यत् (स्वदेशीयरूपेण प्रारूपनिर्माणं विकसितं निर्मितं च) इत्थं हस्ताक्षरितः व्यापारः सर्वकारस्य आत्मनिर्भरभारतस्य, मेक इन इण्डिया इत्यस्य च उपक्रमैः सह सङ्गच्छते।

**बिहार-दुर्घटना**

बिहारप्रदेशे नालन्दाजनपदस्य बिहारशरीफ़े मघड़ा शीतलाष्टमी-मन्दिरे अद्य प्रातः धार्मिकानुष्ठान - समये जनानुधावनस्य कारणात् अष्टौ महिलाभक्ताः मृताः, अन्या: च काश्चन अनेकाः आहताः। आहताः स्थानीयचिकित्सालयेषु प्रवेशिताः। प्रत्यक्षदर्शिनामनुसारेण एकस्याः मिथ्याजनश्रुतेः कारणात् जनसमूहे इतस्ततः अनुधावनं प्रारब्धम्। उद्धारकार्यं प्रचलति। मृतानां संख्या वर्धनस्य संभावना विद्यते।

**राष्ट्रपतिद्रौपदी मुर्मू:**

राष्ट्रपतिद्रौपदी मुर्मु: उक्तवती यत् नालन्दायाः पुनरुत्थानम् केवलं बिहारस्य भारतस्य वा उपलब्धिः एव नास्ति, अपितु सम्पूर्णस्य विश्वस्य बौद्धिक-सांस्कृतिक-पुनर्जागरणस्य आरम्भः अपि अस्ति। राष्ट्रपतिः नालंदाविश्वविद्यालयस्य द्वितीयं दीक्षांतसमारोहं सम्बोधयन्ती आसीत्। राष्ट्रपति मुर्मु: उक्तवती यत् सप्त-चत्वारिंशदुत्तर-द्विसहस्र-ईस्वीय-तमवर्ष-पर्यन्तं 'विकसितभारतस्य' लक्ष्यं प्राप्तुं नालंदाविश्वविद्यालयस्य प्रमुखा भूमिका भविष्यति।

**बाइट-राष्ट्रपति ऑन नालंदा-19 से.**

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**कोलकाता-उच्च न्यायालय**

कोलकाता-उच्चन्यायालयेन अनेकेषां आई. ए. एस्. तथा आई. पी. एस्. अधिकारिणां, अपि च विभिन्नेषु प्रभारी-निरीक्षकानां, प्रभारी-अधिकारिणां, खण्ड-विकास-अधिकारिणां च स्थानान्तरणस्य विरोधं कुर्वत्य: याचिकाः निराकृताः। मुख्यन्यायाधीशस्य सुजॉय पॉलस्य, न्यायमूर्तेः पार्थसारथी सेनस्य च खण्डपीठेन निर्वाचन-आयोगस्य स्थानान्तरण-निर्णयस्य विरुद्धं अधिवक्तुः आर्का नाग इत्यस्याः याचिकायाः प्रतिक्रियारूपेण आदेशः प्रसारिता। स्वस्य आदेशे न्यायालयेन उक्तं यत् सर्वकारीयसेवायां स्थानान्तरणं मानकप्रक्रिया अस्ति तथा च कस्यापि पीडितस्य अधिकारिणः समीपे व्यक्तिगतरूपेण याचिकायै

विधि-माध्यमः अस्ति। न्यायपीठेन इतोऽपि उक्तं यत् एतेषां स्थानान्तरणैः सार्वजनिक-हितानां हानिं कथं जातम्? अथवा राज्यप्रशासनस्य कल्याणकार्याणि च कथं विच्छिन्नानि जातानि? इति प्रदर्शयितुं सर्वकारः अस□लः अभवत्।

-

-

**जनगणना**

विश्वस्य बृहत्तमा जनगणना द्वयोः चरणयोः सञ्चालिता भविष्यति, प्रथमस्य चरणस्य आरम्भः श्वः भविष्यति। प्रथमवारं डिजिटली-रूपेण जनगणनायाः सञ्चालनं भविष्यति, स्वगणनायाः विकल्पोपि उपलभ्यते। भारतस्य महापंजीयकः जनगणना-आयुक्तः च मृत्युंजयकुमार-नारायणः आकाशवाण्या सह वार्तालापं कुर्वन् उक्तवान् पूर्व-जनगणनायाः अपेक्षया सप्तविंशत्यधिक द्विसहस्रतम वर्षस्य जनगणना कथं भिन्नः अस्ति इति उक्तवान्। विदेशेषु निवसन्तः भारतीयाः जनगणनायां कथं भागं ग्रहीतुं शक्नुवन्ति इत्यपि सः स्पष्टीकृतवान्।

**बाइट-मृत्युंजय कुमार नारायण**

**महावीर जयंती**

चतुर्विंशति-तमस्य तथा अन्तिमस्य जैनतीर्थङ्करस्य भगवतः महावीरस्य जन्मजयन्ती महावीरजयन्ती अद्य सम्पूर्णे देशे महतोत्साहेन आचर्यते। महावीरजयन्ती जैनसमुदायस्य कृते अत्यन्तं शुभदिनेषु अन्यतमः इति मन्यते, तेषां धार्मिकजीवने च बहु महत्त्वं धारयति। राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च अद्य महावीरजयन्ति अवसरे देशवासिनां कृते शुभाशयाः प्रेषितवन्तः।

**ईरान-ड्रोन**

इरान्-देशस्य ड्रोन-आक्रमणेन दुबई-तटस्य समीपे एकः विशालः तैलेन पूरितः जलयानः आक्रान्तः, येन वैश्विक-ऊर्जा-आपूर्तिषु व्यापक-संघर्षस्य, व्यवधानस्य च आशङ्का जाता। आक्रमणानन्तरं, द्विलक्ष बैरल परिमितं यावत् अशोधित-तैलं वहतः कुवैत-देशस्य ध्वजयुक्तः अल-सलमी-जलयाने अग्निप्रकोपः अभवत्। दुबई-नगरस्य अधिकारिणः उक्तवन्तः यत्, अग्निः नियन्त्रिता, सर्वे चतुर्विंशति कर्मचारिणः सुरक्षिताः सन्ति। नौकायाः स्वामी कुवैत-पेट्रोलियम-कार्पोरेशन् इत्ययम् आगृहीत् यत् क्षतिना अधुनापि तैलस्य स्राव: भवितुं शक्नोति। अस्मिन् वर्षस्य आरम्भे अमेरिका-इस्राएल-देशयोः इरान-देशस्य उपरि आक्रमणस्य अनन्तरं वर्धमानस्य तनावस्य मध्ये एषा घटना अभवत्।

**आईपीएल**

अद्य आई. पी. एल्. क्रिकेट्-क्रीडायां, न्यू-चण्डीगढ इत्यस्य मुल्लांपुरे महाराजा यादविन्द्रसिङ्घ्-अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे, पञ्जाब-किङ्ग्स, गुजरात-टायटन्स इत्येतयोः मध्ये क्रीडा भविष्यति। प्रतियोगिता सायं सार्द्ध सप्तवादने आरभ्यते।

**टेनिसः**

पूर्वटेनिसक्रीडकः लीण्डर् पेस् अद्य नवदिल्ल्यां दलस्य मुख्यालये केन्द्रीयमन्त्रिणः किरेन् रिजिजुम् सुखंता मजुमदारम् समेत्य दलस्य वरिष्ठनेतृणां उपस्थितौ भारतीयजनतापार्टीति दले सम्मिलितः। पेस् इत्यस्य दलस्य स्वागतं कुर्वन् रिजिजुमहोदयः भाजपा दले तस्य प्रवेशं ऐतिहासिकं वर्णितवान्। पेस् महोदयः प्रधानमन्त्मोरिणः मोदिनः, गृहमन्त्री अमितशाहस्य दलस्य अध्यक्षस्य नितिन नवीनस्य च कृते धन्यवादं प्रदाय उक्तवान् यत् तस्य जीवनस्य महत् दिनमस्ति इति । खेलो-भारत-आन्दोलनस्य, टोप्स्-योजनायाः च प्रशंसाम् कुर्वन् पेस्- अवदत् यत् एषः क्रीडायाः यूनां च सेवितुम् महान् अवसरः अस्ति ।

**॥ इति वार्ता: ॥**